# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्

## सत्रान्तपरीक्षा – डिसेम्बर – २०१८

**कक्षा** – शास्त्रीद्वितीयवर्षम् (SEM- 3) **प्रश्नपत्रम्** – ६ **गुणाः** - ७०

**विषयः** - साहित्यम् **कोड – CC 2.3.6. (OLD)** **समयः** - ०२ तः ०५

**दिनाङ्कः** - १०/१२/२०१८ **सन्दर्भग्रन्थः** – वेणीसंहारम्

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः – १ अधोलिखितेभ्यः कयोश्चिद् द्वयोः ससन्दर्भं व्याख्यां कुरुत।** १०

(१) इन्द्रप्रस्थं वृकप्रस्थं जयन्तं वारणावतम्
प्रयच्छ चतुरो ग्रामान्कञ्चिदेकं च पञ्चमम् ॥

(२) आत्मारामा विहितरतयो निर्विकल्पे समाधौ
ज्ञानोत्सेकाद्विघटिततमोग्रन्थयः सत्त्वनिष्ठाः।
यं वीक्षन्ते कमपि तमसां ज्योतिषां वा परस्तात्
तं मोहान्धः कथमयममुं वेत्तु देवं पुराणम् ॥

(३) भूयः परिभवक्लान्तिलज्जाविधुरिताननम्
अनिःशेषितकौरव्यं न पश्यसि वृकोदरम् ॥

**प्रश्नः – २ वेणीसंहारनाटकस्य रचयितुः स्थितिकालं जीवनवृत्तं च वर्णयत।** १०

**अथवा**

**प्रथमाङ्कस्य सारांशं लिखत।**

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ३ अधोलिखितेषु कारिकाद्वयं ससन्दर्भं व्याख्यायताम्** १०

१. प्रायेणैव हि दृश्यन्ते स्वप्नाः कामं शुभाशुभः।
शतसंख्या पुनरियं सानुजं स्पृशतीव माम् ॥

२. भग्नं भीमेन भवतो मरुता रथकेतनम्।
पतितं किङ्किणीक्वाणबद्धाक्रन्दमिव क्षितौ ॥

३. धर्मात्मजं प्रति यमौ च कथैव नास्ति, मध्ये वृकोदरकिरीटभृतोर्बलेन।
एकोऽपि विस्फुरितमण्डलचापचक्रं, कः सिन्धुराजमभिषेणयितुं समर्थः ॥

**प्रश्नः – ४ द्वितीयाङ्कस्य सारांशं लिखत।** १०

**अथवा**

**वेणीसंहारनाटकस्याधारेण दुर्योधनस्य चरित्रं लिखत**

## तृतीयान्विति:(Unit - 3)

**प्रश्नः – ५ अधोलिखितेषु द्वयो: ससन्दर्भं व्याख्यां कुरुत ।** **१०**

१) एकस्य तावत्पाकोऽयं दारुणो भुवि वर्तते
केशग्रहे द्वितीयेऽस्मिन् नूनं निशेषिता: प्रजा: ॥

२) तेजस्वी रिपुहतबन्धुदुःखपारं, बाहुभ्यां व्रजति धृतायुधप्लवाभ्याम्
आचार्य: सुतनिधनं निशम्य सङ्ख्ये किं शस्त्रग्रहसमये विशस्त्र आसीत् ॥

३) दु:शासनस्य रुधिरे पीयमानेऽप्युदासितम्
दुर्योधनस्य कर्ताऽस्मि किमन्यत्प्रियमाहवे ॥

**प्रश्नः – ६ वेणीसहारं नाट्यशास्त्रदृष्टया समालोच्यताम् ।** **१०**

**अथवा**

**वेणीसंहारनाटके वर्णिता तृतीयाङ्कस्य कथा संक्षेपेण वर्णनीया**

## अन्वितय: १ – ३ (Unit 1 – 3)

**प्रश्नः – ७ दशानां प्रश्नानां लघूत्तरं लिखत** **१०**

१) वेणीसंहारनाटकस्य कथावस्तु कुत: संगृहीतम्?

२) वेणीसंहारनाटकस्य का रीति: ?

३) भीम: को विद्यते ?

४) वेणीसंहारनाटकस्य लेखक: क: ?

५) वेणीसंहारनाटकस्य नायिका का विद्यते ?

६) ’यदाज्ञापयति देव:’ इति कस्योक्ति: ?

७) द्वितियाङ्के कति श्लोका: ?

८) वेणीसंहारकस्य प्रतिनायक: को विद्यते ?

९) कर्ण: कोऽस्ति ?

१०) दुर्योधनस्य सारथि क: ?

११) वेणीसंहारनाटके कति अंका: सन्ति ?

१२) राधेय: क: ?

१३) अश्वत्थामा कोऽस्ति ?

१४) ’वत्स ! सूतपुत्र! शस्त्रग्रहणेनाडलम्’ इति कस्योक्ति: ?

१५) कृपाचार्य: कोऽस्ति ?

*****************